# શ્રીદાનનિર્વર્તનકુણ્ડાષ્ટકમ્

Shri Dananirvartanakundashtakam

sanskritdocuments.org

March 16, 2019

# Shri Dananirvartanakundashtakam

# શ્રીદાનનિર્વર્તનકુણ્ડાષ્ટકમ્

## Sanskrit Document Information

Text title : dAnanirvartanakuNDAShTakam

File name : dAnanirvartanakuNDAShTakam.itx

Category : misc, gurudev, raghunAthadAsagosvAmin, stavAvalI, aShTaka

Location : doc_z_misc_general

Author : RaghunathadAsagosvAmi

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From Collected prayers by Raghunatha Dasa Goswami Stavavali

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 15, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 16, 2019

*sanskritdocuments.org*

# શ્રીદાનનિર્વર્તનકુણ્ડાષ્ટકમ્

સ્વદયિતગિરિકચ્છે ગવ્યદાનાર્થમુચ્ચૈઃ
 કપટકલહકેલિં કુર્વતોર્નવ્યયૂનોઃ ।
નિજજનકૃતદર્પૈઃ ફુલ્લતોરીક્ષકેઽસ્મિ-
 ન્સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૧॥

નિભૃતમજનિ યસ્માદ્દાનનિર્વૃત્તિરસ્મિ-
 નત ઇદમભિધાનં પ્રાપ યત્તત્સભાયામ્ ।
રસવિમુખનિગૂઢે તત્ર તજ્ઞૈકવેદ્યે
 સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૨॥

અભિનવમધુગન્ધોન્મત્તરોલમ્બસઙ્ઘ
 ધ્વનિલલિતસરોજવ્રાતસૌરભ્યશીતે ।
નવમધુરખગાલીક્ષ્વેલિસઞ્ચારકામ્રે
 સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૩॥

હિમકુસુમસુવાસસ્ફારપાનીયપૂરે
 રસપરિલસદાલીશાલિનોર્નવ્યયૂનોઃ ।
અતુલસલિલખેલાલબ્ધસૌભાગ્યફુલ્લે
 સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૪॥

દરવિકસિતપુષ્પૈર્વાસિતાન્તર્દિગન્તઃ
 ખગમધુપનિનાદૈર્મોદિતપ્રાણિજાતઃ ।
પરિતૌપરિ યસ્ય ક્ષ્મારુહા ભાન્તિ તસ્મિ-
 ન્સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૫॥

નિજનિજનવકુઞ્જે ગુઞ્જિરોલમ્બપુઞ્જે
 પ્રણયિનવસખીભિઃ સંપ્રવેશ્ય પ્રિયૌ તૌ ।
નિરુપમનવરઙ્ગસ્તન્યતે યત્ર તસ્મિ-
 ન્સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૬॥

સ્ફટિકસમમતુચ્છં યસ્ય પાનીયમચ્છં
    ખગનરપશુગોભિઃ સમ્પિબન્તીભિરુચ્ચૈઃ ।
નિજનિજગુણવૃદ્ધિર્લભ્યતે દ્રાગમુસ્મિ-
    ન્સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૭॥

સુરભિમધુરશીતં યત્પયઃ પ્રત્યહં તાઃ
    સખિગણપરિવીતો વ્યાહરન્પાયયન્ગાઃ ।
સ્વયમથ પિબતિ શ્રીગોપચન્દ્રોઽપિ તસ્મિ-
    ન્સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૮॥

પઠતિ સુમતિરેતદ્દાનનિર્વર્તનાખ્યં
    પ્રથિતમહિમકુણ્ડસ્યાષ્ટકં યો યતાત્મા ।
સ ચ નિયતનિવાસં સુષ્ઠુ સંલભ્ય કાલે
    કલયતિ કિલ રાધાકૃષ્ણયોર્દાનલીલામ્ ॥ ૯॥

ઇતિ  શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        શ્રીદાનનિર્વર્તનકુણ્ડાષ્ટકં સમ્પૂર્ણમ્ ।

---

*Shri Dananirvartanakundashtakam*

pdf was typeset on March 16, 2019

Please send corrections to *sanskrit@cheerful.com*